# शिक्षा निदेशालय, राष्ट्रीय राजधानी क्षेत्र, दिल्ली

**अभ्यास-प्रश्नपत्रम् – 2024-25**

**कक्षा – एकादशी**

**संस्कृतम् (केन्द्रिकम्) (कोड सं.-322)**

**समयः- होरात्रयम्** **सम्पूर्णाङ्काः 80**

अस्य प्रश्नपत्रस्य भागपञ्चकं अस्ति -

'क' भागः अपठितअवबोधनम्10 अङ्काः
'ख' भागः रचनात्मक कार्यम् 15 अङ्काः
'ग' भागः अनुप्रयुक्त-व्याकरणम् 20अङ्काः
'घ' भागः 35 अङ्काः
(i) पठितावबोधनम् (25 अङ्काः)
(ii) संस्कृत-साहित्येतिहासस्य सामान्यः परिचयः (10 अङ्काः)

सामान्यनिर्देशाः –

- उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमाङ्कः अवश्यं लेखनीयः।
- प्रश्नसङ्ख्या प्रश्नपत्रानुसारम् अवश्यमेव लेखनीया।
- सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि।
- प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः।

| 'क' भागः – अपठित-अवबोधनम | | |
|---|---|---|
| 1. | अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानामुत्तराणि संस्कृतेन लिखत –<br>मनुष्य: एक: सामाजिक: प्राणी अस्ति।मनुष्याणां सद्व्यवहारेण एव समाजे सुखस्य शान्ते: च स्थापना भवति, सामाजिक- | 10 |

वातावरणं च सौहार्दपूर्णं भवति। अस्माकं वेदेषु यथोक्तं – ‘संगच्छध्वं संवदध्वं सं वो मनांसि जानताम्’। अस्य मन्त्रस्य तात्पर्यमिदं वर्तते यत् समाजे सर्वे जना: मिलित्वा गच्छन्तु, मिलित्वा एकस्वरेण वदन्तु, सर्वत्र प्रेमपूर्ण: व्यवहार: भवेत्। यजुर्वेदे कथितं – ‘मित्रस्य चक्षुषा सर्वाणि मित्राणि समीक्षे’ अर्थात् अहं सर्वान् जनान् मैत्रीभावेन पश्येयम् इति। कुत्रापि हिंसाया: भावना न भवेत्। आत्मन: प्रतिकूलम् आचरणं न कर्तव्यम्। अनया भावनया संपूर्णसमाज: एव आदर्शसमाज: इति कथ्यते। येषां जीवने परोपकारादय: गुणा: विलसन्ति, तेषां जीवनमेव सार्थकं जीवनम् उच्यते। एतत् सर्वं [illegible]

[illegible]

[illegible] 1×2=2

[illegible]

(अ) एकपदेन उत्तरत - केवलं प्रश्नद्वयम् 2×2=4

(i) मनुष्य: कीदृश: प्राणी अस्ति ?

(ii) केन समाजे सुखस्य शान्ते: च स्थापना भवति ?

(iii) कुत्रापि कस्या: भावना न भवेत् ?

(आ) पूर्णवाक्येन उत्तरत - केवलं प्रश्नद्वयम् 1×1=1

(i) केषां जीवनं सार्थकम् उच्यते ? 1×3=3

(ii) वेदेषु सहभावनाया: कृते किम् उक्तम् ?

(iii) यजुर्वेदे मैत्रीभावनाया: कृते किं कथितम् ?

(इ) अस्य अनुच्छेदस्य समुचितं शीर्षकं लिखत।

(ई) यथानिर्देशम् उत्तरत- केवलं प्रश्नत्रयम्

(i) ‘गच्छन्तु’ इति क्रियापदस्य कर्ता क: ?

(क) मनुष्य: (ख) मिलित्वा

(ग) समाजे (घ) सर्वे जना:

| | | |
|---|---|---|
| | (ii) “अहिंसा” इति पदस्य किं विलोमपदं गद्यांशे प्रयुक्तम् ?<br>(क) परोपकारम् (ख) आचरणम्<br>(ग) हिंसा (घ) सात्विकम्<br>(iii) “सर्वान्” इत्यस्य विशेषणपदस्य किं विशेष्यमत्र प्रयुक्तम्?<br>(क) मित्राणि (ख) जनान्<br>(ग) मैत्रीभावेन (घ) मनुष्याणाम्<br>(iv) “व्यवहार:” इति पदस्य किं पर्यायपदम् अनुच्छेदे प्रयुक्तम् ?<br>(क) गुण: (ख) मनांसि<br>(ग) सामाजिकम् (घ) आचरणम् | |
| ‘ख’ भागः -- रचनात्मककार्यम् | | |
| 2. | भवान् / भवती गायत्री ।भवत्याः कन्याकुमारी-स्थिते विवेकानन्दविद्यालये संस्कृतसप्ताहः आचरितः। भवत्याः मित्रं फातिमा गया-नगरस्थे महाविद्यालये पठति। संस्कृतसप्ताहस्य वर्णनं कृत्वा मित्रं प्रति लिखितं पत्रं मञ्जूषापदसाहाय्येन पूरयित्वा पुनः लिखत ।<br>कन्याकुमारीतः<br>(i)…………………<br><br>प्रियसखि (ii)……………………<br>सप्रेम नमस्ते।<br><br>अत्र सर्वे (iii)……………..। भवती अपि कुशलिनी इति मन्ये ।अस्माकं विद्यालये गतमासे (iv) ………………… आचरणं जातम्। विद्यालयस्य (v) …………… संस्कृतसप्ताहाचरणस्य उद्घाटनं कृतवान्। एकं सप्ताहं यावत् प्रातः कालीनसभा (vi) ………………….. एव प्रवृत्ता । 'संस्कृतं विज्ञानम् च' इति विषये काचित् प्रदर्शनी अपि आयोजिता आसीत्। छात्राणां शिक्षकाणां च कृते विभिन्ना: (vii) ……………… आयोजिताः | ½×10=<br>5 |

| | | |
|---|---|---|
| | आसन् । संस्कृतप्रश्नोत्तरीस्पर्धायां मम गणः (viii)<br>…………………… प्राप्नोत् । समापनकार्यक्रमे (ix)<br>……………………. मनोरञ्जनकार्यक्रमान् प्रस्तुतवन्तः ।<br>शिष्टं सर्वम् अग्रिमपत्रे लेखिष्यामि। मातृपितृचरणयोः मम<br>प्रणामाः ।।<br><br>भवत्या: अभिन्नमित्रम्<br>(x) ……………………..<br>मञ्जूषा<br>संस्कृतेन, छात्राः, संस्कृतसप्ताहस्य, गायत्री, कुशलिनः,<br>प्रथमस्थानम्, प्रतियोगिताः , 25 अगस्त 2024, फातिमे,<br>प्राचार्य: | |
| 3. | मञ्जूषाप्रदत्त-पदसहायतया अधोलिखितां कथां पूरयत -एकदा<br>अतिवृष्टिः भवति। नदीषु अत्यधिकं (i) …………वहति । सर्वे<br>प्रदेशाः जलमयाः भवन्ति। तीरे स्थिताः<br>(ii)…………………जलमध्ये निमज्जन्ति । शशकाः, शृगालाः,<br>भल्लूकाः अन्ये च पशवः नद्याः प्रवाहे<br>(iii)…………………।'मम गुहा जलमयी भवेत्" इति भयेन<br>वनराजः (iv) ……………..स्वप्राणरक्षार्थं गिरिशिखरम्<br>आरोहति। एकः गजः प्राणिनां संहारं पश्यति। सः व्याकुलः भवति<br>। जलं प्रविश्य स प्रवाहपतितान् पशून् शुण्डया<br>(v)…………..उपवेशयति , तान् गिरिशिखरं नयति च । एवं सः<br>बहूनां पशूनां (vi)……………………करोति। शनैः शनैः वर्षा<br>विरमति। प्राणिजीवनं सुस्थिरं भवति । अथ पशवः सम्मिलिताः<br>भवन्ति। ते (vii)……………………..प्रति कृतज्ञतां प्रकटयन्ति।<br>"त्वम् अस्माकं हृदयस्य राजा गजराजः असि" इति ते साश्रुनयनैः<br>तं वदन्ति। तद् श्रुत्वा सिंहः ब्रूते- "अहं (viii)………………… | ½×10=<br>5 |

| | | |
|---|---|---|
| | अस्मि । इह न अन्यः कोऽपि राजा अस्ति ।" पशवः तस्मै (ix)................ – "यः प्रजानां प्राणरक्षणं करोति सः राजा भवति । सङ्कटकाले त्वया अस्माकं प्राणाः न रक्षिताः। अतः वयं गजं (x)...............मन्यामहे ।" ततः प्रभृति गजराजः इति शब्दः भाषायां रूढः अभवत्।<br><br>मञ्जूषा-<br><br>एव , सिंहः , प्राणिनः,जलं, अकथयन् , पतन्ति , 'गजराजं' , वनराजः, स्वपृष्ठे , प्राणरक्षणं | |
| 4. | अधोलिखितसंवादे रिक्तस्थानानि पूरयन्तु।<br>मृदुलः- सोहम! अद्य भवान् अल्पाहारार्थं किम् आनीतवान्?<br>सोहमः- 1 - ...............................................।<br>मृदुलः- पिज्जा... अरे भवान् तु सर्वदा एतादृशं भोजनम् आनयति।<br>सोहमः- 2- ...............................................।<br>मृदुलः- नहि मित्र ! यद्यपि 'फास्ट-फूड' इति तुभ्यं रोचते परं स्वास्थ्याय बहुहानिप्रदं भवति ।<br>सोहमः 3- ...............................................।<br>मृदुलः- न अहम् तु स्वास्थ्यनाशकं भोजनं न कदापि करोमि, अल्पाहारार्थं च द्विदलं दधि ओदनं च आनीतवान्?<br>सोहमः- 4- ...............................................।<br>मृदुलः- मित्र ! द्विदलादिकं न रोचते? तथापि सदैव स्मरणीयं तथ्यमिदं यत् रुचिकरं भोजनं सर्वदा स्वास्थ्यवर्धकं न भवति ।<br>सोहमः- 5- ...............................................।<br>मृदुलः- शोभनम् एतदेव उपयुक्तम्। पुनः फास्टफूड इति न खादतु। | 1×5=5 |

## 'ग' भागः – अनुप्रयुक्तं व्याकरणम्

| | | |
|---|---|---|
| 5. | अधोलिखित-वाक्येषु रेखाङ्कितपदानां समुचितं सन्धिं सन्धिच्छेदं वा कुरुत – (केवलं प्रश्नत्रयम्)<br>1. <u>कृतास्ते</u> तात मन्त्रिणः ।<br>2. कुत्र वा <u>ममाम्बा</u> ?<br>3. धनानि जीवितं <u>च+एव</u> परार्थे प्राज्ञ उत्सृजेत् ।<br>4. <u>मेखला+इव</u> भुवो विन्ध्यावटी नाम । | 1×3=3 |
| 6. | अधोलिखित-वाक्येषु रेखाङ्कितपदानां समुचितं संयोजितं विभाजितं वा प्रकृतिं प्रत्ययं प्रदत्तविकल्पेभ्यः चिनुत – (केवलं प्रश्नत्रयम्)<br><br>(i) कथञ्चित् <u>अभि+वि+ज्ञा+ल्यप्</u> विवर्णवदनं कृशम्।<br>(क) अभिविज्ञाय (ख) अभिज्ञाय<br>(ग) अभिविज्ञायप (घ) अभिविज्ञालयप<br><br>(ii) अपगतासूंश्च <u>कृत्वा</u> क्षितावपातयत्।<br>(क) कृ + त्वा (ख) कृ+क्त्वा<br>(ग) कृ+वा (घ) कृ+कृत्वा<br><br>(iii) तातस्तु तद् <u>अवलोक्य</u> ।<br>(क) अव+लोक्+य (ख) वअव+लोक् + यत्<br>(ग) अव+लोक् +तव्यत् (घ) अव+लोक् + ल्यप्<br><br>(iv) कर्णं <u>दा+क्त्वा</u> ।<br>(क) दातव्यम् (ख) दत्त्वा<br>(ग) आदाय (घ) दातुम् | 1×3=3 |

| | | |
|---|---|---|
| 7. | अधोलिखितवाक्येषु प्रदत्तविकल्पेभ्यः समुचितशब्दं चित्वा रिक्तस्थानानि पूरयत। (केवलं प्रश्नत्रयम्)<br><br>(i) अङ्के ------------ आरोप्य रामः सादरं पर्यपृच्छत् ।<br>(क) भरतात् (ख) भरतम्<br>(ग) भरतस्य (घ) भरताय<br>(ii) iv) अपत्यनिर्विशेषाणि ------ विप्रकरोषि ।<br>(क) सत्त्वं (ख) सत्त्वानि<br>(ग) सत्त्वाय (घ)सत्वस्य<br><br>(iii) महाराजस्य सुन्दरम् ---------------- आसीत् ।<br>(क) मुखे (ख) मुखात्<br>(ग) मुखम् (घ) मुखयोः<br>(iv) हे वत्स ! ----------- मेधावी असि।<br>(क) यूयं (ख) त्वम्<br>(ग) त्वाम् (घ) तव | 1×3=3 |
| 8. | अधोलिखितवाक्येषु प्रदत्तविकल्पेभ्यः समुचितक्रियापदं चित्वा रिक्तस्थानानि पूरयत। (केवलं प्रश्नत्रयम्)<br>(i) अहं पुराणप्रवचनं न -----------।<br>(क) कुर्वः (ख) करोति<br>(ग) करोषि (घ) करोमि<br>(ii) गौराङ्गः पञ्चाशन्मुद्राः ---------।<br>(क) ददसि (ख) दत्थ<br>(ग) ददाति (घ) ददति | 1×3=3 |

| | | |
|---|---|---|
| | (iii) केचन जना: एकं बालकं -----------।<br>(क) ताडयति (ख) ताडयन्ति<br>(ग) ताडयथ (घ) ताडयसि<br>(iv) राजद्वारे श्मशाने च य: ------- स: बान्धव:।<br>(क) तिष्ठति (ख) तिष्ठत:<br>(ग) तिष्ठसि (घ) तिष्ठामि | |
| 9. | समुचितं उपपदविभक्तिरूपं चिनुत- (केवलं प्रश्नत्रयम्)<br>I. ------------- परितः नाना वृक्षाः सन्ति । (पुष्करिणी)<br>II. विनाशे ----------- सति त्याग: वरं भवति । (नियत )<br>III. पुराणिकशास्त्री ---------- साकं राजभवनम् आगच्छत् । (पुत्र)<br>IV. --------- सह तेनैव पथा उपागमत् ।(मुनिकुमार) | 1×3=3 |
| 10. | अधोलिखितवाक्येषु वाच्यानुसारं रिक्तस्थानानि पूरयत- (केवलं प्रश्नद्वयम् )<br>(i) पुरुषेण एते ---------- हातव्या: ।<br>(क) षड्दोषम् (ख) षड्दोषे<br>(ग) षड्दोषा: (घ) षड्दोषान्<br>(ii) ----------- ते दन्तान् गणयिष्ये ।<br>(क) अहम् (ख) मया<br>(ग) अस्मान् (घ) मम<br>(iii) सः बालः राजानं --------- ।<br>(क) वदसि (ख) वदति<br>(ग) वदन्ति (घ) वदामि | 1×2=2 |

| | | |
|---|---|---|
| 11. | रेखांकितस्य अशुद्धपदस्य स्थाने प्रदत्तविकल्पेभ्यः शुद्धं पदं चित्वा लिखत (केवलं प्रश्नत्रयम्)<br>(i)रोचते मे एष: <u>मयूराय</u> ।<br>(क) मयूरेण (ख) मयूर:<br>(ग) मयूरात् (घ) मयूरस्य<br>(ii) अहं ते क्रीडनकं दास्यति ।<br>(क) दास्यसि (ख) दास्यन्ति<br>(ग) दास्यामि (घ) दास्याम:<br><br>(iii) तस्य पश्चिमे <u>तीरं</u> महाजीर्ण: शाल्मलीवृक्ष:।<br>(क) तीरस्य (ख) तीरे<br>(ग) तीरेण (घ) तीराय<br>(iv) <u>मुनिकुमारं</u> सह तेनैव पथा आगच्छत् ।<br>(क) मुनिकुमारः (ख) मुनिकुमारेण<br>(ग) मुनिकुमारैः (घ) मुनिकुमारान् | 1×3=3 |
| खण्डः – घ भाग - ।<br>पठितांशावबोधनम् 25 अङ्काः | | |
| 12. | अधोलिखितं गद्यांशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत –<br>एकदा मुनिः चिन्तामग्नः - केन प्रकारेण इमे जनाः बोधयितव्याः ? पुष्करिणीतः पङ्कोद्धारो न भवति । प्रतिदिनं च जलं प्रदूषितं भवति ।तत् प्रदूषितं जलं पीत्वा जना अपि रुग्णा: भवन्ति । कथं च इमे वारणीयाः ? सहसा कोलाहलः श्रुतः। मुनिः बहिरागत्य अपश्यत् । केचन जनाः एक बालकं ताडयन्ति । तं च भर्त्सयन्ति। बालकः भयेन कम्पते क्रन्दति च । मुनिः तत्र उपस्थितः । जनान् वारयित्वा अपृच्छत् किम् अभवत्? किमर्थं भवन्तः एनं ताडयन्ति | 5 |

| | | |
|---|---|---|
| | ? जनाः अवदन्। एष मिथ्यावादी । सदैव मिथ्याभाषणं करोति । वृथा सर्वान् प्रतारयति। सद्यः अस्मान् प्रतारितवान् ।<br><br>(अ) एकपदेन उत्तरत -<br>(क) क: बहिरागत्य अपश्यत् ?<br>(ख) प्रतिदिनं किम् प्रदूषितं भवति ?<br>(ग) पङ्कोद्धारो कुत: न भवति ?<br>(आ) पूर्णवाक्येन उत्तरत -<br>(क) बालकः किमर्थं कम्पते क्रन्दति च ?<br>(ख) मुनिः जनान् किम् अपृच्छत् ?<br>(ग) जनाः कथं रुग्णाः भवन्ति?<br>(इ) यथानिर्देशमुत्तरत-<br>(क) 'प्रदूषितं' इति विशेषणपदस्य विशेष्यपदं किम् ?<br>(ख) 'सत्यवादी' इति पदस्य विलोमपदम् अत्र किं प्रयुक्तम् ?<br>(ग) ' किमर्थं भवन्तः एनं ताडयन्ति ? ' इत्यत्र क्रियापदं किम् ? | ½×2=1<br><br>1×2=2<br><br>1×2=2 |
| 13. | अधोलिखितं पद्यं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत –<br>काचः काञ्चनसंसर्गात् धत्ते मारकरतीं द्युतिम् ।<br>तथा सत्सन्निधानेन मूर्खो याति प्रवीणताम् ।।<br>कुसुमस्तबकस्येव द्वयी वृत्तिर्मनस्विनः ।<br>सर्वेषां मूर्ध्नि वा तिष्ठेत् विशीर्येत वनेऽथवा ।।<br><br>एकपदेन उत्तरत-<br>(क) काचः किं धत्ते ?<br>(ख) क: प्रवीणतां याति ?<br>(ग) कस्य संसर्गात् काच: द्युतिं धत्ते ?<br><br>पूर्णवाक्येन उत्तरत- | 5<br><br>½×2=1 |

| | | |
|---|---|---|
| | (क) मनस्विनः कीदृशी द्वयी वृत्तिः भवति ?<br>(ख) कुसुमस्तबकस्य इव कस्य वृत्तिः भवति ?<br>(ग) मूर्ख: कथं प्रवीणतां याति ?<br><br>निर्देशानुसारम् उत्तरत -<br>(क) 'मूर्खो याति प्रवीणताम्' अत्र किं क्रियापदं प्रयुक्तम् ?<br>(ख) 'कानने' इतिपदस्य किं पर्यायपदं प्रयुक्तम् ?<br>(ग) 'विद्वान्' पदस्य कि विलोमपद प्रयुक्तम् ? | 1×2=2<br><br><br><br>1×2=2 |
| 14. | अधोलिखितं नाट्यांशं पठित्वा तदाधारितान् प्रश्नान् संस्कृतेन उत्तरत –<br>वै. गौराङ्ग- इमा मुद्रा गृहणीष्व, नाहं किमपि जानामि ।<br>मौनमास्स्व, गच्छ। अपरञ्च पटं निर्माय मत्समीपम् एवानय ।<br>युष्मत्कुटुम्बरक्षायै न प्रतिज्ञा कृता मया । कथं रक्षा भवेदेतत् त्वं जानीहि व्रजाधुना ॥<br>(स मुद्रा न गृहणाति अथापरस्तन्तुवायः पटविक्रयार्थं प्रविश्य पटक्रयार्थं श्रेष्ठिनं लक्षयति ।)<br>तन्तुवायः - श्रेष्ठिन् ! गृहाण पटम्।<br>श्रेष्ठी -- (भ्रूसंज्ञया) अयं क्रेष्यति नाहं क्रेतुं शक्नोमि ।<br>तन्तुवायः - कस्मात् ?<br>श्रेष्ठी - अस्य समीपे राज्ञः प्रमाणपत्रम् अयमेव क्रेष्यति, नापरः ।<br>वै.गौराङ्गः - इत आगच्छ (तन्तुवायमाह्वयति, प्रमाणपत्रं दर्शयति । पटं गृहणाति) गृहाणेमाश्चत्वारिंशन्मुद्राः । (इति मुद्रा ददाति ) ।<br>तन्तुवाय: - महाराज! किमिदं विधीयते? किमयमेव न्यायः ?<br>वै.गौराङ्गः - गच्छ गच्छ। नाहं न्यायमन्यायं वा जानामि ।<br>यन्मया निश्चीयते दीयते च तदेव मूल्यम्। (उभौ तद्दत्तं मूल्यं गृहणीत: । )<br>उभौ तन्तुवायौ - नात: परं पटं निर्मास्याव: । | 5 |

| | | |
|---|---|---|
| | एकपदेन उत्तरत-<br>(क) क: क्रेतुं न शक्नोति ?<br>(ख) कस्य समीपे राज्ञः प्रमाणपत्रम् ?<br>(ग) अतः परं किं न निर्मास्याव: ?<br>II. पूर्णवाक्येन उत्तरत-<br>(क) गौराङ्ग: मूल्यविषये किं कथयति ?<br>(ख) तन्तुवाय: किमर्थं श्रेष्ठिनं लक्षयति ?<br>(ग) गौराङ्ग: तन्तुवायाय कति मुद्रा: ददाति ?<br>III. निर्देशानुसारम् उत्तरत-<br>(क) 'वस्त्रम्' इत्यर्थे अत्र किं पदं प्रयुक्तम् ?<br>(ख) 'न प्रतिज्ञा कृता मया' अत्र 'मया' इति सर्वनामपदं कस्मै प्रयुक्तम् ?<br>(ग) 'जानीहि' इति क्रियापदस्य कर्तृपदं किम् ? | ½×2=1<br><br><br><br>1×2= 2<br><br><br><br>1×2=2 |
| 15. | अधोलिखितस्य पद्यस्य भावार्थं मञ्जूषाप्रदत्तपदैः पूरयित्वा पुनः लिखत –<br>एकोऽप्यमात्यो मेधावी शूरो दक्षो विचक्षण: ।<br>राजानं राजपुत्रं वा प्राप्येन्महतीं श्रियम्।।<br><br>भावार्थ:- एक: (i), ----------- शूरवीर: कुशल: (ii). .............एकाकी सन्नपि राजपरिवारं महतीं (iii) ........... प्रापयेत् ।<br>मञ्जूषा<br>मन्त्री, बुद्धिमान्, लक्ष्मीं<br><br>अथवा<br>प्रदत्त-भावार्थत्रयात् शुद्धं भावार्थं चित्वा लिखत-<br>(क) अव्यक्ता हि गतिर्दु:खं देहवद्भिरवाप्यते ।<br>i. अव्यक्ता गति: दु:खं ददाति । | 1×3=3<br><br><br><br><br><br><br><br><br><br>1×3=3 |

| | | |
|---|---|---|
| | ii. मानवैः अव्यक्तस्य ईश्वरस्य ज्ञानं कष्टेन प्राप्यते ।<br>iii. अव्यक्तस्य गतिः भृशं तीव्रा भवति ।<br><br>(ख) मन्त्रो विजयमूलं हि राज्ञां भवति राघव ।<br>i. राजानः विजयप्राप्त्यर्थं मन्त्रं वदन्ति ।<br>ii. गुप्तमन्त्रणाद्वारा राजानः निश्चयेन विजयं प्राप्नुवन्ति ।<br>iii. राघवः राज्ञां विजयस्य कारणं अस्ति ।<br><br>(ग) क्षिप्रमारभसे कर्म न दीर्घयसि राघव<br>i. हे भरत! त्वं कार्यं यथाशीघ्रं करोषि , न विलम्बेन ।<br>ii. हे भरत!यदा इच्छसि तदैव कार्यं कुरु।<br>iii. हे भरत!कार्यं विलम्बेन करणीयं, शीघ्रतया न । | |
| 16. | अधोलिखित-अन्वये रिक्तस्थानानि पूरयत –<br>तुल्यनिन्दास्तुतिर्मौनी संतुष्टो येन केनचित्।<br>अनिकेतः स्थिरमतिर्भक्तिमान्मे प्रियो नरः ॥<br><br>अन्वयः - तुल्यनिन्दास्तुतिः, (i)............... येन केनचित्<br>(ii)............ अनिकेतः, स्थिरमतिः, भक्तिमान्(iii).............. मे प्रियः । | 1×3=3 |
| 17. | ‘क’ स्तम्भस्य वाक्यांशस्य ‘ख’ स्तम्भस्य वाक्यांशेन सह मेलनं कुरुत -<br>‘क’ स्तम्भः — ‘ख’ स्तम्भः<br>1 षड्दोषाः पुरुषेणेह — i दुःखाय परिवर्तते<br>2 कच्चिच्चापररात्रेषु राजन् — ii षड् जीवलोकस्य सुखानि<br>3 वश्यश्च पुत्रोऽर्थकरी च विद्या — iii हातव्याः<br>भूतिमिच्छता | ½×4=2 |

| | | |
|---|---|---|
| | 4 पूर्वावधीरितं श्रेयो      iv चिन्तयस्यर्थनैपुणम् | |
| 18. | अधोलिखितवाक्येषु रेखाङ्कितानां पदानां प्रसंगानुसारं शुद्धम् अर्थं चित्वा लिखत –<br>(केवलं प्रश्नचतुष्टयम्)<br>(i) ततः पङ्कोद्धारं कृत्वा पुष्करिणीं गभीरां कृतवन्तः।<br>(ii) इत्थं निदाघकालः उपगतः।<br>(iii) सुष्ठु सङ्गीतं शिक्षित्वा सम्यग्गातुं भवान् अभ्यस्यतु ।<br>(iv) तदनन्तरं शास्त्री च पुत्रश्च स्वगृहाय संन्यवर्तताम्।<br>(v) किं नो अपत्यनिर्विशेषाणि सत्त्वानि विप्रकरोषि।<br>मंजूषा -<br>ग्रीष्मकाल: , प्राणिन:, सम्यक्तया ,तत्पश्चात्,तडागम् | ½×4=2 |
| | **संस्कृतसाहित्येतिहासपरिचयः** | |
| 19. | संस्कृतभाषाया: उद्भवं विकासं च अधिकृत्य प्रदत्तान् प्रश्नान् उत्तरत - (केवलं प्रश्नत्रयम् )<br>(i) संस्कृतम् इति शब्दस्य का व्युत्पत्तिः ?<br>(ii) 'वसुधैव कुटुम्बकम् ' इति कस्या: भाषाया: उद्घोष: ?<br>(iii)'वेदा:' लौकिक-संस्कृतस्य भाग: अथवा वैदिकसंस्कृतस्य?<br>(iv) 'देववाणी, गीर्वाणीभारती, सुरभारती, आर्यभाषा' इत्यादयः कस्या भाषायाः नामानि ? | 1×3=3 |
| 20. | वैदिकं साहित्यम् अधिकृत्य प्रदत्तवाक्येषु मञ्जूषाया: साहाय्येन रिक्तस्थानपूर्तिं कुरुत - | 1×4=4 |

| | | |
|---|---|---|
| | (i) यजूषां संग्रह: ------- अस्ति ।<br>(ii) वेदा: ------- सन्ति ।<br>(iii) वेदरूपीपुरुषस्य मुखं -------- स्मृतम्।<br>(iv) प्राचीनतमः ग्रन्थः ---------- अस्ति।<br><br>मञ्जूषा<br>चत्वारः, व्याकरणम्, ऋग्वेद:, यजुर्वेदः | |
| 21. | रामायणं महाभारतं पुराणानि च अधिकृत्य 'क' भागं 'ख' भागेन सह मेलयत -<br><br>'क' भाग: 'ख' भाग:<br>1. पुराणानि i महर्षि वेदव्यासः<br>2. महाभारतस्य रचयिता ii रामायणम्<br>3. चतुर्विंशतिसाहस्री iii अष्टादश | 1×3=3 |